



**पराङ्कुशाचार्य वैदिक अध्ययन संस्था (पञ्जीकृता)**
https://parankusan.cloudapp.net ✉: pivstrust@gmail.com

# चतुर्दश विद्यास्थानानि

- वेदाः अङ्गैः उपाङ्गैश्च (उपवेदैश्च) सहिताः **विद्यास्थानानि** (ज्ञानस्रोतसाम् आकराः) भवन्ति । [विद्या ह्येताश्चतुर्दश]
- तेषां 'तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया' इत्युक्तक्रमेण वर्णाश्रमधर्मत्वेन कर्तव्यबुद्ध्या अध्ययनात् **धर्म**स्थानत्वमपि तेषां सिद्ध्यति [स्थानानि विद्याया धर्मस्य च चतुर्दश] ।
- तेषामेव पुनः 'अधीति-बोध-आचरण-प्रचारणैः' चतस्रः दशाः प्रापितानां चतुर्दशत्वमपि सिद्ध्यति ।
- वेदाध्येतारः लक्षण-साङ्ग-भाष्याध्ययन-स्तरत्रयेण त्रिदशाः ['ए॒ते वै दे॒वाः प्र॒त्यक्षं॒ यद्ब्रा॑ह्म॒णाः'] (भूदेवाः) भवन्ति ।

वेदवारिधिः प. रामानुजाचार्यः